योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०५०

पञ्चाशः सर्गः ५०

श्रीवसिष्ठ उवाच ।

इमे ये जीवसंघाता दृश्यन्ते दश दिग्गताः ।

नरनागसुरागेन्द्रगन्धर्वाद्यभिधानकाः ।। १

ते स्वप्नजागराः केचित्केचित्संकल्पजागराः ।

केचित्केवलजाग्रत्स्थाश्चिराज्जाग्रत्स्थिताः परे ।। २

घनजाग्रत्स्थिताश्चान्ये जाग्रत्स्वप्नास्तथेतरे ।

क्षीणजागरकाः केचिज्जीवाः सप्तविधाः स्मृताः ।। ३

श्रीराम उवाच ।

एतेषां भगवन्भेदो बोधाय मम कथ्यताम् ।

जीवानां सप्तरूपाणां जलानामर्णवेष्विव ।। ४

श्रीवसिष्ठ उवाच ।

कस्मिंश्चित्प्राक्तने कल्पे कस्मिंश्चिज्जगति क्वचित् ।

केचित्सुप्ताः स्थिता देहैर्जीवा जीवितधर्मिणः ।। ५

ये स्वप्नमभिपश्यन्ति तेषां स्वप्नमिदं जगत् ।

विद्धि ते हि खलूच्यन्ते जीविकाः स्वप्नजागराः ।। ६

क्वचिदेव प्रसुप्तानां यः स्वप्नः स्वयमुत्थितः ।

विषयः सोऽयमस्माकं तेषां स्वप्ननरा वयम् ।। ७

तेषां चिरतया स्वप्नः स जाग्रत्त्वमुपागतः ।

स्वप्नजागरकास्ते तु जीवास्ते तद्गताः स्थिताः ।। ८

सर्वज्ञत्वात्सर्वगस्य सर्वं सर्वत्र विद्यते ।

येन स्वप्नवतां तेषां वयं स्वप्ननराः स्थिताः ।। ९

श्रीराम उवाच ।

येषु कल्पेषु ते जाताः क्षीयन्ते कल्पकल्पनाः ।

यदि तास्तत्कथं तेषां प्रबुद्धानामवस्थितिः ।। १०

श्रीवसिष्ठ उवाच ।

इह स्वप्नभ्रमान्ते ते मुच्यन्ते वा विनिद्रताम् ।

प्राप्य संकल्पतो देहांस्तथैवान्यान्श्रयन्त्यलम् ।। ११

तथैवान्यं प्रपश्यन्ति जगत्कल्पं च कल्पितम् ।

कल्पनाभासनभसो न हि संकटता भवेत् ।। १२

संकल्पनात्मकजगज्जीर्णोदुम्बरकीटकाः ।

स्वप्नजागरकाः प्रोक्ताः श्रृणु संकल्पजागरान् ।। १३

कस्मिंश्चित्प्राक्तने कल्पे कस्मिंश्चिज्जगति क्वचित् ।

अनिद्रालव एवान्तः संकल्पैकपराः स्थिताः ।। १४

ध्यानाद्विलुठिता वाथ मनोराज्यवशानुगाः ।

संकल्पदार्ढ्यमापन्ना गलिताग्रानुभूतयः ।। १५

संकल्प एव जाग्रत्त्वं येषां चिरतयांशतः ।

तत्रास्तमितचेष्टानां ते हि संकल्पजागराः ।। १६

संकल्पोपशमे भूयस्तमन्यं वा श्रयन्ति ते ।

देहे तेषां वयमिमे संकल्पपुरुषाः स्थिताः ।। १७

संकल्पजागराः प्रोक्ता एते संकल्पशायिनः ।

जीवा जीवितगा लोकाः श्रृणु केवलजागरान् ।। १८

प्राथम्येनावतीर्णास्ते ब्रह्मणो बृंहितात्मनः ।

प्रोक्ताः केवलजागर्याः प्रागुत्पत्त्यविकासिनः ।। १९

भूयो जन्मान्तरगतास्त एव चिरजागराः ।

कथ्यन्ते प्रौढिमायाताः कार्यकारणचारिणः ।। २०

त एव दुष्कृतावेशाज्जडस्थावरतां गताः ।

घनजाग्रत्तया प्रोक्ता जाग्रत्सु घनतां गताः ।। २१

ये तु शास्त्रार्थसत्सङ्गबोधिता बोधमागताः ।

पश्यन्ति स्वप्नवज्जाग्रज्जाग्रत्स्वप्ना भवन्ति ते ।। २२

ये तु संप्राप्तसंबोधा विश्रान्ताः परमे पदे ।

क्षीणजाग्रत्प्रभृतयस्ते तुर्यां भूमिकां गताः ।। २३

इति सप्तविधो भेदो जीवानां कथितस्तव ।

समुद्राणामिव मया बुद्ध्वा श्रेयःपरो भव ।। २४

भ्रान्तिं परित्यज जगद्गणनात्मिकां त्वं

बोधैकरूपघनतामलमागतोऽसि ।

शून्यत्ववर्जितमशून्यतया च मुक्तं

तेन द्वयैक्यकविमुक्तवपुस्त्वमाद्यम् ।। २५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षो० निर्वाणप्रकरणे उत्तरार्धे जीवसप्तकप्रकारवर्णनं नाम पञ्चाशः सर्गः ।। ५० ।।